एषा विनोदसञ्चिका

एतां सञ्चिकां विनोदसञ्चिकात्वेन भवतां हस्तेषु समर्पयति सम्भाषण-सन्देशः । विनोदप्रधाना सञ्चिका 'विनोदसञ्चिका' इति उच्यते, मल्लप्रधानः ग्रामः मल्लग्रामः इव । मल्लग्रामे प्राधान्येन मल्लाः निवसन्ति । एतस्य अयं नार्थः यत् मल्लेतरजनाः तत्र न निवसन्ति एव इति । तादृशाः अपि तत्र सन्ति एव । एवम् एव विनोदसञ्चिकायां यदि अन्ये अपि विषयाः स्युः तर्हि किम् अनौचित्यम् ? न किमपि । एवं ननु ?

किमर्थम् एतस्मिन् एव मासे एषा सञ्चिका प्रकाश्यमाना अस्ति ? इत्यस्य उत्तरम् - अशोकवनिकान्यायेन एषा सञ्चिका प्रकाश्यमाना अस्ति इति । रावणः सीतां लङ्कां नीत्वा अशोकवने स्थापितवान् । एतद्विषये कश्चित् पृच्छेत् - 'सीता किमर्थम् अशोकवने एव स्थापिता ?' इति । यदि सीता आम्रवणे स्थापिता स्यात् तर्हि अपि अन्यः पृच्छेत् - 'किमर्थं सीता आम्रवणे एव स्थापिता ?' इति । अथवा यदि सीता विशिष्टे भवने कस्मिंश्चित् स्थापिता स्यात् तर्हि अपि अन्यः पृच्छेत् - 'किमर्थं सीता विशिष्टे भवने स्थापिता ?' इति । वस्तुतस्तु सीतां लङ्कां नीतवता रावणेन वा कुत्रचित् तु स्थापनीया आसीत् एव । तदनुगुणं तेन सा अशोकवने स्थापिता । अतः सीतास्थापनस्य न कोऽपि विशिष्टोद्देशः । एषः एव अशोकवनिकान्यायः नाम । अस्माभिः अपि तेनैव न्यायेन विनोदसञ्चिका प्रकाश्यमाना अस्ति । यस्मिन् कस्मिंश्चित् वा मासे एषा प्रकाशयितुं शक्या । कस्मिंश्चित् मासे एषा प्रकाशनीया आसीत् अपि । अतः एषः मासः अस्माभिः एतदर्थं स्वीकृतः ।

प्राचीने संस्कृतसाहित्ये हास्यरसपोषकाः अंशाः न न्यूनाः । प्रकरणेषु, प्रहसनेषु, सुभाषितेषु, गद्यपद्यसाहित्ये चापि हास्यं प्राधान्येन गौणतया वा, अंशतः साकल्येन वा दृश्यते एव । किन्तु एतत् तु स्पष्टम् एव यत् आधुनिके काले अन्यभाषासु सरलगद्यशैल्या निरूपितं हास्यसाहित्यं यत् दृश्यते तादृशं संस्कृते अतिविरलतया दृश्यते इति । संस्कृतक्षेत्रे सरलगद्यशैल्या विषयस्य निरूपणार्थं प्रयत्नः एव अल्पप्रमाणेन प्रवृत्तः । अतः सामान्यजनैः अपि अवगन्तुं योग्यः गद्यप्रकारः संस्कृते अत्यल्पतया एव विकसितः दृश्यते ।

सामान्यजनानाम् आदरं विना भाषा विस्तरं न प्राप्नोति । विस्तरं विना भाषायाः जीवनं कष्टकरम् एव स्यात् । सामान्यजनाः कदा वा आदरं प्रदर्शयन्ति ? यदा ते तया भाषया व्यवहर्तुं शक्नुवन्ति तदा, यदा ते तया भाषया लिखितं विनायासम् अवगन्तुं शक्नुवन्ति तदा वा । अतः सामान्यजनानां निमित्तं साहित्यसृष्टिः भाषाविकासक्षेत्रे विशेषप्राधान्यम् आवहति इत्यत्र तु नास्ति संशयलेशः अपि ।

सामान्यजनानां हस्ते यत् दीयते तत्र वैविध्यं यदि स्यात् तर्हि रुचिः वर्धेत इति उद्देशेन एषा हास्यसञ्चिका वाचकाणां करकमलेषु समर्प्यते । विषयवैविध्योपेता एषा सञ्चिका सर्वेभ्यः रोचेत इति भावयामः वयम् ।

- सम्पादकः

''मनःकर्तृ मनो भोक्तृ मानसं विद्धि मानवम्'' **- योगवासिष्ठम्**

मनः सर्वं करोति, सर्वम् अनुभवति च । तत् मानवं निर्माति अपि ।